Digitization by eGangotri-South Center

ॐ

॥ स्तोत्रत्रयी ॥

इन्द्राक्षीस्तोत्रम् शिवकवचस्तोत्रम्
श्रीदक्षिणामूर्तिस्तोत्रम् च ॥

नागरी

चित्पुरीवेदशास्त्रपाठशालाध्यापकेन
ब्रह्मश्री सोमसुन्दरशास्त्रिणा
परिशोधिता ॥

एन्. ए. चूडामणिशर्मणा
प्रकाशीकृता ॥
विजयतेतमाम् ॥

SECOND EDITION

PRINTED AT
THE SCHOLAR PRESS,
PALGHAT

1946

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॐ

॥ स्तोत्रत्रयी ॥

इन्द्राक्षीस्तोत्रम् शिवकवचस्तोत्रम्
श्रीदक्षिणामूर्तिस्तोत्रम् च ॥

चित्पुरीवेदशास्त्रपाठशालाध्यापकेन
ब्रह्मश्री सोमसुन्दरशास्त्रिणा
परिशोधिता ॥

एन्. ए. चूडामणिशर्मणा
प्रकाशीकृता ॥
विजयतेतमाम् ॥

SECOND EDITION

PRINTED AT
THE SCHOLAR PRESS,
PALGHAT

1946

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॐ

श्रीगुरुभ्यो नमः ॥

श्रीधर्मशास्ता शरणम् ॥

प्रस्तावना ॥

भो आस्तिकाग्रेसराः—

विदितमिदं समेषां विदुषामविदुषां च, यत्, इन्द्राक्षीशिवकवचस्तोत्रे दैवशक्तिसम्पन्ने मन्त्रराजाविति च । अर्थे ह्यनयोः पर्यालोच्यमान इदन्नः प्रतिभाति, यत् सन्निपातज्वरादिसन्निपातेऽपि एतन्मन्त्राभिमन्त्रितभस्मधारणेन वात्यया तूलराशिरिव ज्वरादिकं सुदूरमपसरतीति । अद्यापिहि बहवो जना एतन्मन्त्राभिमन्त्रितं भस्म धारयन्तः सुखमेधन्त इति सर्वविदितमिदम् । एवं गुरोरनुग्रहं विना न कश्चित् किञ्चित् कर्तुं विशेषतो विद्यार्थिनः प्रभवन्तीत्यपि सार्वजनीनम् । अतस्तत्र च श्रीदक्षिणामूर्तिस्तोत्रपठनमेवोपायं मन्यमानैः एन्. एन्. अप्पादुरभट्टवर्यैर्नूरणिग्रामाभिजनैः स्वप्रतिष्ठापितश्रीधर्मपाठशालाविद्यार्थिनामन्येषां चोपकारायेयं स्तोत्रत्रयी मुद्रापितेति ते नितरां धन्यवादानर्हन्ति । स्तोत्रत्रयी चेयं संप्रति यशःकायेन जीवितां सुगृहीतनाम्नामेतद्ग्रामाभिजनानां ब्रह्मश्रीयुतशामुशास्त्रिवर्याणां स्वहस्तलिखिततालवृन्तपुस्तकमादर्शीकृत्य परिशोधिता । कालमहिम्ना हि परिहीयमानानीमानि स्तोत्ररत्नानि सर्वेऽप्यास्तिकाः सादरं सश्रद्धं च पठित्वा परमं श्रेयोऽवाप्नुयुरिति सुदृढोऽयमस्माकं विश्वासः ॥

इति सुधीजनविधेयः

सोमसुन्दरशास्त्री ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॐ

॥ श्रीरस्तु ॥

इन्द्राक्षीस्तोत्रं प्रारभ्यते ॥

अस्य श्री इन्द्राक्षीस्तोत्रमहामन्त्रस्य पुरन्दर ऋषिः, अनुष्टुप् छन्दः, इन्द्राक्षी देवता, लक्ष्मीं बीजं, भुवनेश्वरीं शक्तिः, महेश्वरीं कीलकं, इन्द्राक्षीप्रसाद-सिध्यर्थे जपे विनियोगः, इन्द्राक्षीं अङ्गुष्ठाभ्यान्नमः, भुवनेश्वरीं तर्जनीभ्यान्नमः, महेश्वरीं मध्यमाभ्यां नमः, अम्बुजाक्षीमनामिकाभ्यान्नमः, कात्यायनीं कनिष्ठिकाभ्यां नमः, कौमारीं करतलकरपृष्ठाभ्यान्नमः, इन्द्राक्षीं हृदयाय नमः, भुवनेश्वरीं शिरसे स्वाहा, महेश्वरीं शिखायै वषट्, अम्बुजाक्षीं कवचाय हुं, कात्यायनीं नेत्रत्रयाय वौषट्, कौमारीं अस्त्राय फट्, भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम्—

नेत्राणान्दशभिश्शतैः परिवृतामत्युग्रचर्माम्बरां
हेमाभां युवतीं विळम्बितशिखामामुक्तकेशाननाम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घण्टामण्डितपादपद्मयुगळां नागेन्द्रकुम्भस्तनीं
इन्द्राक्षीं हृदि चिन्तयामि सततं प्रत्यक्षसिद्धिप्रदाम् ॥

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥

इन्द्राक्षीं सहयुवतीं नानालङ्कारभूषिताम् ।
प्रसन्नवदनाम्भोजामप्सरोगणसेविताम् ॥

इन्द्रादिभिस्सुरैर्वन्द्यां वन्दे शङ्करवल्लभाम् ।
एवं ध्यात्वा महादेवीं जपेदिष्टार्थसिद्धये ॥

इन्द्र उवाच—

इन्द्राक्षी नाम सा देवी दैवतैस्समुदाहृता ।
गौरी शाकम्भरी देवी दुर्गानाम्नीति विश्रुता ॥

कात्यायनी महादेवी चण्डखण्डा महातपाः ।
सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ॥

नारायणी भद्रकाळी रुद्राणी कृष्णपिङ्गला ।
अग्निज्वाला रौद्रमुखी कालरात्री तपस्विनी ॥

मेघस्वना सहस्राक्षी विकटाङ्गी जडोदरी ।
महोदरी मुक्तकेशी घोररूपा महाबला ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अजिता भद्रदा नन्दा रोगहर्त्री शिवप्रिया ।
शिवदूती कराली च शक्तिश्च परमेश्वरी ॥

महिषासुरसंहारी चामुण्डाऽसुरमर्दिनी ।
इन्द्राणी चेन्द्ररूपी च इन्द्रशक्तिः परायणी ॥

शिवा च शिवरूपा च शिवशक्तिः परायणी ।
सदा सम्मोहिनी देवी सुन्दरी भुवनेश्वरी ॥

आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।
वाराही नारसिंही च भीमा भैरवनादिनी ॥

श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मी सरस्वती ।
अनन्ता विजयाऽपर्णा मानस्तोकाऽपराजिता ॥

भवानी पार्वती दुर्गा हैमवत्यम्बिका शिवा ।
शिवा भवानी रुद्राणी शङ्करार्धशरीरिणी ॥

मृत्युञ्जयी महामायी सर्वरोगप्रणाशिनी ।
ऐरावतगजारूढा भूषिता कनकप्रभा ॥

एतैर्नामपदैर्दिव्यैः स्तुता शक्रेण धीमता ।
आयुरारोग्यमैश्वर्यमपमृत्युभयापहम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्षयापस्मारकुष्ठादितापज्वरनिवारणम् ।
शीतज्वरनिवारणं सन्निज्वरनिवारणम् ॥
उष्णज्वरनिवारणं सर्वज्वरनिवारणम् ॥

शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनात् ।
आवर्तयन्सहस्रं तु लभते वाञ्छितं फलम् ॥

एतत्स्तोत्रं जपेन्नित्यं सर्वव्याधिविनाशनम् ।
रणे राजभये चोरे सर्वत्र विजयी भवेत् ॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥

त्रिपाद्वस्मप्रहरणस्त्रिशिरा रक्तलोचनः ।
स मे प्रीतिसुखं दद्यात् सर्वामयपतिर्ज्वरः ॥

ज्वरं च ज्वरसारं च ज्वरातिसारमेव च ।
सन्निपातज्वरञ्चैव शीतोष्णज्वरमेव च ॥

कुबेरन्ते मुखं रौद्रं नन्दिमानन्दिमावह ।
ज्वरं मृत्युभयं घोरं ज्वरं नाशयते ज्वरः ॥

ज्वरराजाय विद्महे त्रिशिरस्काय धीमहि,
तन्नो ज्वरः प्रचोदयात् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भस्मायुधाय विद्महे रक्तनेत्राय धीमहि,
तन्नस्त्रिपात् प्रचोदयात् ।
ज्वालामालाय विद्महे वज्रदंष्ट्राय धीमहि,
तन्नो ज्वरहरः प्रचोदयात् ॥

मृत्योस्तुल्यं त्रिलोकीं ग्रसितुमतिरसा-
न्निस्सृताः किन्नु जिह्वाः
किं वा कृष्णाङ्घ्रिपद्मद्युतिभिररुणिता
विष्णुपद्याः पदव्यः ।
प्राप्ताः सन्ध्याः स्मरारेः स्वयमुत नुतिभि-
स्तिस्र इत्यूह्यमानाः
देवैर्देव्यास्त्रिशूलक्षतमहिषजुषो
रक्तधारा जयन्ति ॥

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्मितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निश्शेषीकृतरक्तबीजदनुजे नित्ये निशुंभापहे
शुंभध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

हरिः ओम् ॥

इति इन्द्राक्षीस्तोत्रं संपूर्णम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॐ

॥ गणेशाय नमः ॥

शिवकवचस्तोत्रं प्रारभ्यते ॥

हरिः ओम् ॥

अस्य श्रीशिवकवचस्तोत्रमहामन्त्रस्य वृषभयोगीश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीसाम्बसदाशिवो देवता, ह्रां बीजं, ह्रीं शक्तिः, ह्रूं कीलकं, श्रीसाम्बसदाशिवप्रीत्यर्थे जपे विनियोगः, ह्रां अङ्गुष्ठाभ्यान्नमः, ह्रीं तर्जनीभ्यान्नमः, ह्रूं मध्यमाभ्यान्नमः, ह्रैं अनामिकाभ्यां नमः, ह्रौं कनिष्ठिकाभ्यान्नमः, ह्रः करतलकरपृष्ठाभ्यां नमः, ह्रां हृदयाय नमः, ह्रीं शिरसे स्वाहा, ह्रूं शिखायै वषट्, ह्रैं कवचाय हुं, ह्रौं नेत्रत्रयाय वौषट्, ह्रः अस्त्राय फट् भूर्भुवस्सुरोमिति दिग्बन्धः ॥

ध्यानम्—

रुद्राक्षकङ्कणलसत्करदण्डयुग्मं
फालान्तराळसितभस्ममयत्रिपुण्ड्रम् ।
पञ्चाक्षरं परिपठन् वरमन्त्रराजं
ध्यायन् सदा पशुपतिं शरणं भजामि ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं वरपरशुमृगाभीतिहस्तं त्रिणेत्रम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं सकलभयहरं विश्वरूपं पुराणम् ॥

ॐ वज्रदंष्ट्रं त्रिणयनं कालकण्ठमरिन्दमम् ।
सहस्रकरमत्युग्रं ध्यायेद्रुद्रं सदाशिवम् ॥

अथापरं सर्वपुराणगुह्यं निश्शेषपापौघहरं पवित्रम् ।
जयप्रदं सर्वविपद्विमोचनं वक्ष्यामि शैवं कवचं हिताय ॥

ओन्नमो भगवते महारौद्रज्वलज्ज्वालामालिने, ओं श्रीं ह्रीं क्लीं परमन्त्रपरयन्त्रपरतन्त्रपरविद्याच्छेदनाय, पराविद्यास्तंभनाय, आत्माविद्याप्रापणाय, ज्ञानप्रदाय, यं रुद्राय, रं रुद्राय, यं यं यं हुं फट्, स्वाहा ॥

ओं वृषभ उवाच—

नमस्कृत्वा महादेवं विश्वव्यापिनमीश्वरम् ।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥

शुचौ देशे समासीनो यथावत्कल्पितासनः ।
जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम् ।
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत्परानन्दमयं महेशम् ॥

ध्यानावधूताखिलकर्मबन्धश्चिरं चिदानन्दनिमग्नचेताः ।
षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥

मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे ।
तन्नाम दिव्यं परमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥

सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानन्दघनश्चिदात्मा ।
अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥

यो भूमिरूपेण बिभर्ति विश्वं पायात्स भूमौ गिरिशोऽष्टमूर्तिः
योऽपां स्वरूपेण नृणां करोति संजीवनं सोऽवतु मां जलेभ्यः

कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः
स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात् ॥

प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ।
चतुर्मुखस्तत्पुरुषस्त्रिणेत्रः प्राच्यां स्थितो रक्षतु मामजस्रम् ॥

कुठारवेदाङ्कुशपाशशूलकपालमाला ग्न्यिकणान्दधानः ।
चतुर्मुखो नीलरुचित्रिणेत्रः पायादघोरो दिशि दक्षिणस्याम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कुन्देन्दुशङ्खस्फटिकावभासो
वेदाक्षमालावरदाभयाङ्कः ।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः
सद्योऽधिजातोऽवतु मां प्रतीच्याम् ॥

वराक्षमालाऽभयटङ्कहस्तस्सरोजकिञ्जल्कसमानवर्णः ।
त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः

वेदाभयेष्टाङ्कुशपाशशङ्ककपालढक्काक्षकशूलपाणिः ।
सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्ध्वं परमप्रकाशः॥

मूर्धानमव्यान्मम चन्द्रमौलिः फालं ममाव्यादथ फालनेत्रः
नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः॥

पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली
वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः॥

कण्ठं गिरीशोऽवतु नीलकण्ठः पाणिद्वयं पातु पिनाकपाणिः
दोर्मूलमव्यान्मम धर्मबाहुर्वक्षःस्थलं दक्षमखान्तकोऽव्यात्

ममोदरं पातु गिरीन्द्रधन्वा मध्यं ममाव्यान्मदनान्तकारी ।
हेरम्बतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्मरारिरव्यान्मम गुह्यदेशं पृष्ठं सदा रक्षतु शूलपाणिः ।
ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोऽव्यात् ॥

जङ्घायुगं पुङ्गवकेतुरव्यात् पादौ ममाव्यात् सुरवन्द्यपादः
महेश्वरः पातु दिनाद्ययामे मां मध्ययामेऽवतु वामदेवः ॥

त्रियम्बकः पातु तृतीययामे वृषध्वजः पातु दिनान्त्ययामे
पायान्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे

गौरीपतिः पातुः निशावसाने
मृत्युञ्जयो रक्षतु सार्वकालम् ।
अन्तःस्थितं रक्षतु शङ्करो मां
स्थाणुः सदा पातु बहिःस्थितं माम् ॥

तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समन्तात् ।
तिष्ठन्तमव्याद्भुवनैकनाथः पायाद्व्रजन्तं प्रमथाधिनाथः ॥

वेदान्तवेद्योऽवतु मां निषण्णं
मामव्ययः पातु शिवः शयानम् ।
मार्गेषु मां रक्षतु नीलकण्ठः
शैलादिदुर्गेषु पुरत्रयारिः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः ।
कल्पान्तकालोग्रपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोशः ॥

घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ।
पत्त्यश्वमातङ्गघटावरूथिनीसहस्रलक्षायुतकोटिभीषणम् ॥

अक्षौहिणीनां शतमाततायिनां
छिन्द्यान्मृडो घोरकुठारधारया ।
निहन्तु दस्यून्प्रळयानलार्चि-
र्ज्वलत्त्रिशूलस्त्रिपुरान्तकस्य ॥

शार्दूलसिंहर्क्षमृगादिहिंस्रान्
सन्त्रासयत्वीशधनुः पिनाकः ॥

दुःस्वप्नदुश्शकुनदुर्गतिदौर्मनस्य
दुर्भिक्षदुर्व्यसनदुस्सहदुर्यशांसि ।
उत्पाततापविषभीतिमसद्ग्रहार्तिं
व्याधींश्च नाशयतु मे जगतामधीशः ॥

ओन्नमो भगवते सदाशिवाय, सकलतत्वात्मकाय, सकलतत्वविदूराय, सकललोकैककर्त्रे, सकललोकैक-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भर्त्रे, सकललोकैकसंहर्त्रे, सकललोकैकगुरवे, सकललोकैकसाक्षिणे, सकलनिगमगुह्याय, सकलदुरितार्तिभञ्जनाय, सकलजगदभयङ्कराय, सकललोकैकशङ्कराय, शशाङ्कशेखराय, शाश्वतनिजावासाय, निराभासाय, निरामयाय, निरातङ्काय, निष्कळङ्काय, निष्प्रपञ्चाय, निस्सङ्गाय, निर्द्वन्द्वाय, निर्गुणाय, निर्मलाय, निरुपमविभवाय, निराधाराय, निरालम्बाय, नित्यशुद्धबुद्धमुक्तपरिपूर्णसच्चिदानन्दाद्वैतपरमशान्तप्रकाशाय, तेजोरूपाय, तेजोमयाय, तेजोधिपतये, ओं जयरुद्र, महारौद्र, वीरभद्रावतार, महाभैरव, कालभैरव, कल्पान्तभैरव, कपालमालाधर, खट्वाङ्गखड्गचर्मपाशाङ्कुशडमरुकशूलचापबाणगदाशक्तिभिण्डिपालतोमरमुसलमुद्गरप्रासपरिघमुसुण्ढिशतघ्निचक्राद्यायुधभीषणकर, सहस्रमुखदंष्ट्राकराळवदन, विकटाट्टहासविस्फाटितब्रह्माण्डमण्डल, नागेन्द्रकुण्डल, नागेन्द्रहारवलय, नागेन्द्रचर्मधर, अमृतमृत्युंजय त्र्यम्बक, त्रिपुरान्तक, नीलकण्ठ, विरूपाक्ष, विश्वेश्वर, वृषभवाहन, विषभूषण, विषभक्षण, विश्वतोमुख, सर्वतोमुख, मां रक्ष रक्ष, ज्वल ज्वल, प्रज्वल प्रज्वल,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महामृत्योरपमृत्योर्भयं नाशय नाशय, चोरान्मारय मारय, विषसर्पभयं शमय शमय, मम शत्रूनुच्चाटयोच्चाटय, शूलेन विदारय विदारय, कुठारेण भिन्धि भिन्धि, खड्गेन छिन्धि छिन्धि, खट्वाङ्गेन व्यपोथय व्यपोथय, मुसलेन निष्पेषय निष्पेषय, बाणेन सन्ताडय सन्ताडय, रक्षांसि भीषय भीषय, भूतानि विद्रावय विद्रावय, कूश्माण्डभूतवेताळमारीचब्रह्मराक्षसगणान् सन्त्रासय सन्त्रासय, ममाभयं कुरु कुरु, वित्रस्तं मामाश्वासयाश्वासय, दुःखातुरं मामानन्दयानन्दय, क्षुत्तृष्णार्तं मां आप्याययाप्यायय, अमृतकटाक्षवीक्षणेन मां सञ्जीवय सञ्जीवय, नरकभयान्मामुद्धारयोद्धारय, मरणभयान्मां सञ्जीवय सञ्जीवय, शिवकवचेन मामाच्छादयाच्छादय, अमृतमृत्युञ्जय, सदाशिव, नमस्ते नमस्ते ॥

इत्येतत्परमं शैवं कवचं व्याहृतं मया ।
सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥

यस्सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ।
न तस्य जायते क्वापि भयं शंभोरनुग्रहात् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा ।
सद्यस्सुखमवाप्नोति दीर्घमायुश्च विन्दति ॥

सर्वदारिद्र्यशमनं सर्वमङ्गळवर्धनम् ।
यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥

महापातकसङ्घातैर्मुच्यते चोपपातकैः ।
देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः ॥

त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम् ।
धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥

इति स्कान्दे महापुराणे ब्रह्मोत्तरखण्डे ब्रह्मनारदसंवादे शिवकवचमहिमा नाम द्वादशोऽध्यायः ॥

हरिः ओं शुभमस्तु ॥

॥ इति शिवकवचस्तोत्रं संपूर्णम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॐ

॥ श्रीगुरुभ्यो नमः ॥

श्रीदक्षिणामूर्तिस्तोत्रं प्रारभ्यते ॥

मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यस्साक्षात् कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृंभयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवांभोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमितिभ्रान्ता भृशं वादिनः
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत् सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तःस्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामित-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

भूरम्भांस्यनलोऽनिलोंऽबरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥

चिद्घनाय महेशाय वटमूलनिवासिने ।
ओङ्कारवाच्यरूपाय दक्षिणामूर्तये नमः ॥

इति श्रीदक्षिणामूर्तिस्तोत्रं संपूर्णम् ॥

❀ ॐ तत्सत् ❀

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.